हमानि शोकफलदानं वालिष्टानि तान्येव यस्यमाणफलदान यो
ग्यानि अस्मिन्वर्षे नान्यथा बलाविता विसहमनामानि प्रथमतो
विचार्याणि २८

**अष्टमाधिपतिना युतेक्षितं स्यात्पह
गुप्तमथेत्यशालितः संभवेपि विलयं प्रया
ति यतेन जन्मनि पुरे दृमीदृपतौ २९**

अथान्यदपि नैर्बल्यलक्षणं रव्योक्तयाह अष्टमाधिपतिरिति
यत्सहमं वर्षलग्नादष्टमराशीश्वरेणाशुभेन पापेन वा युतमी
क्षितं वा तथा पापग्रहयुतं पापग्रहेणादृष्टयुतं वा तथानैरष्टमा
धिपतिना पापग्रहैर्वा अन्यथा शालिमुथशिलयोगकारि चेद्भवे
त्तदसंभवेपि स्वस्वामिना शुभखगैः सहितं च दृष्टमित्यादिना
सहमस्य फलदातृतासंभवेपि तत्सहमं विलग्ने फलं दातासा
मर्थ्यह्रासान्नाशं प्रयातीति निष्फलं भवतीत्यर्थः तेन कारणेन
जन्मकाले पुराप्यमनन्तरं सहमबलाबलमीक्ष्यता देवर्तैर्वि
चार्यताम्

आदौ जन्मनि सर्वेषां सहमानां बलाबलं विमृश्य पश्चात्संभवो येषां तानि वर्षे विचिन्तयेत् २

अथास्य मर्थस्वयमनुष्टुभाविष्टणोति
आदाविति स्पष्टार्थमप्ययम् २

सबले पुण्यसहमे धर्मसिद्धिर्धनागमः शुभस्वामीतिनयुते व्यत्ययेव्यत्ययं विदुः

अथ सहमफलान्यपूर्वपीठिकां विधाय तत्फलान्यभि ३१
धातुकामः प्राधान्यादादौ पुण्यसहमस्य फलमनुष्टुभाह स
बल इति स्पष्टार्थं पद्यम् धर्मस्य पूर्विकाल्हाघ्निकशुभकर्मा
नुष्ठानस्य पुण्यापरपर्यायस्य सिद्धिर्निष्पत्तिः ३१

लग्नात्षष्ठाष्टरिष्फस्थे धर्मभाग्ययशोहरं शुभस्वामीदृशाप्ते सत्वधर्मादिसंभवः

अथ पुण्यसहमसंबंध्यशुभफलं सापवादमनुष्टुभाह ३२
लग्नादिति वर्षप्रवेशलग्नात्पुण्यसहमं षष्ठाष्टमद्वादशस्थं चे
त्तदा धर्मभाग्ययशोनाशकं भवेत् यदि तत्सहमस्वामि
नाशुभेन पापेन वा दृष्टं न पलक्षणात्वा युक्तं न वा चेत्तदा शोभनं
त्वधर्मादिसंभवः अशुभं तु फलं वर्षारंभ एव ज्ञेयं शुभविलो
कनाभावे पापग्रहावलोकने च सम्पूर्णवर्षपर्यन्तं तत्सहमसं
बंधिशुभमेव स्यादित्यर्थः ३२ **पापयुक्ते शुभदृष्टे च**
शुभं प्राक्ततः शुभे शुभयुक्ते पापदृष्टे
मादौ शुभमसत्परे ३३ अथ पापशुभग्रहसंबंधेन
युतिदृष्ट्योः फलमनुष्टुभाह पापयुगिति तत्पुण्यसहमं पाप
युक्तं शुभदृष्टं चेद्भवति तदा प्राग्वर्षपूर्वार्द्धे अशुभं ततो वर्षोत्तरा

नी॰
प॰

ष्टं शुभं स्यात् यदा तत्सहमं शुभयुक्तं पापदृष्टं वा स्यात्तदा दोषवर्ष
पूर्वार्द्धे शुभं सूतौ वर्षोत्तरार्द्धे त्वशुभं यदा त्वशुभदृष्टं शुभयुक्तं तदा
संपूर्णं वर्षं शुभमेव स्यात् यदा तु पापदृष्टं पापयुक्तं स्यात्तदा संपूर्णं
वर्षमशुभमेव स्यात् ३३

यत्राह्ने पुण्यसहमं शुभं सोऽह्नः शुभावहः अनिष्टेऽस्मिन्नशुभोऽनेन पुण्यमासो विचारयेत् ३४

अथ सर्वसहमशिरोमणेः पुण्यसहमस्य माहात्म्यमनुष्टुभाह
यत्राह्नीति स्पष्टार्थं पद्यं अह्न इत्युपलक्षणं तेन जातकेपि
पुण्यसहमविचारश्चावश्यकः जन्मनि वर्षे च स्वबलाबलं पुण्यस
हमस्येति समरसिंहोक्तेः ३४

सूतौ षष्ठाष्टरिष्फस्थमह्ने पापहतं पुनः पुण्यं धर्मार्थसौख्यघ्नं पापैर्योगे दृशे फलं तथा ३५

अथात एव पुण्यसहमस्य जन्मलग्ने निष्टस्थान
स्थितिवशेनाशुभफलमनुष्टुभाह सूताविति तत्पुण्यस
हमं सूतौ जन्मलग्नात्षष्ठाष्टरिष्फस्थं चेद्वर्षेऽह्नि पुनः पापहृतं
पापयुतं पापदृष्टं वा धर्मार्थसौख्यनाशकृत् फलं स्यात् ३५

सहमान्यखिलानीत्थं सूतौ वर्षे च चिंतयेत् मांद्यारिकलिमृत्यूनां व्यत्ययाद्दिशेत्फलं ३६

अथ पुण्यसहमविचारं सर्वेष्वतिदिशन्के
षुचित्सहमेषु फलेऽतिदिशन्केषुचित्सहमेषु फलविपर्य
यं चानुष्टुभाह सहमानीति पूर्वार्द्धं स्पष्टार्थम् मांद्येति मां
द्यं रोगः अरिर्वैरी कलिः कलहः मृत्युर्मरणं अशुभफलस्या
पि फलत्वाद्दारिद्र्यमपि एषां पंचानां सहमानां पुण्यसहम
फलवद्विचारे कि यमशुभत्वमागतं तदेषां समी
नं फलं वाच्यं यद्यशुभमागतं तदेषां समीचीनं वाच्यमित्यर्थः

कार्यसिद्धिसहमं युतं शुभैर्दृष्टमत्र शशिलग्नयप्रदं संगरेष्वशुभपापदृष्टयुक् क्लेशतो जयप्रदीरितो बुधैः ३७

अथ केषांचित्सहमानां विशेषेण शुभाशुभफलानि विवक्षुः

संस्तावत्कार्यसिद्धिसद्मस्य शुभाशुभफलं रपयोद्दनयाह कार्यसि
द्धिसद्ममिति कार्यसिद्धिसद्म शुभग्रहैर्युतमथवा दृष्टं तथा शु
भग्रहकृतमुथशिलयोगं गतं वा चेत्स्यात्तदा संगरे संग्रामे जयप्रदं
स्यात् अथ तत्सद्म शुभपापदृष्टयुक्तं वा तदा क्लेशात्तोत्साय शोन शु
ये जयप्रदीरितः संगरस्तु पलत्वणा विवादादेः ३७

**कलिसद्म मिथो विशाखदृष्टिसंयुतं यदि पापमु
थशिलीकले स्मृति अथ तत्र सौम्यसहितं
वलोकितेजयमीति मिथशेशिनः कलिवृथे ३८**

नजयो न पराजयः

अथ कालिसद्मस्य शुभाशुभफलमनुभाषितुमाह कलिसद्मेति
कलि कलहकस्य सद्म सद्मं शुभपापग्रहैर्युगपद्दृष्टं संयुतं वा चे
त्स्यात्तथा पापग्रहकृतमुथशिलयोगं चेत्तदापि कले कलहे निमि
त्तो ऽस्ति शमोति अथ कलिसद्म सौम्यग्रहैः सहितं वलोकि
तं वा अथवा सहिते वा वलोकिते च सति कलिमनुष्यस्य संगरे वशी
नजयमेति यदि मिश्राणां शुभपापग्रहाणां कलिसद्मे दृष्टिः स्यात्त
दा कलिवृथे प्रति नजयो न पराजय इत्यर्थः ३८

**विवाहसद्माधिपसौम्यदृष्टयुतं शुभैर्मुथशि
लितदैभिः कुर्यात्तदा मिथसमेतदृष्टकष्टद
थक्रूरस्तीस्थैर्न ३९**

अथ विवाहसद्मस्य शुभाशु
भफलमनुज्ञात्याह विवाहसद्मेति विवाहसद्मं तत्स्वामिना शु
भैर्वा दृष्टं युतं वा स्यान्न यामशुभग्रहकृतमुथशिलयोगं गतं चेत्तदा
पितृदाभिः विवाहस्याभिलषितं कुर्यात् यदा तु विवाहसद्मं मिश्र
ग्रहैः समेतं युक्तं दृष्टं वा उपलक्षणात्वान्मिश्रग्रहकृतमुथशि
लयोगं गतं चेत्तदा कष्टात्कष्टमनुभूय तदाभिः विवाहाभिं कुर्यात् अ
थवा तद्विवाहसद्म क्रूरस्तीसंज्ञः क्रूरेण क्रूराभ्यां क्रूरैर्वा ऽस्थल
ग्नाद्विवाहसद्माद्वाऽष्टमराशीश्वरेण युतं दृष्टं वा मुथशिलकृतं
वा तदा तस्मिन्वर्षे विवाहो नैव स्यात् ३९

**यशोधिपैनेथ नगेवलेन युतेतिते सथशा
सौविनाशः पापार्जितस्याय शसोस्तिला
भोनष्टेर्ज्जमिस्यात्कलकीर्तिनाशः ४०**

अथ यशः सद्मस्य ताद्दशशुभफलमुपजात्याह यशोधिपेइति
यशः सद्माधिपे निधनगेऽष्टमस्थानगे पापग्रहेण युते वा इति
ते वा सत्यनेककालार्जितस्य सतः समीचीनस्य यशसो विनाशः
स्यात् इदानीं वक्ष्यं कृतपापार्जितस्य यशसोऽपकीर्त्यपरं त्वा

नी॰
ष॰

भोत्ति यतस्त्व नष्टोजस्यात्संग्रहे वाप्यशः सहमेशेसति स्वव
शुभेत्थशालेशुभदृग्गु शीयकीर्तिनाशःस्यात् ४॰
तैर्वाबलान्विते स्याद्यशसोभिवृद्धिः युद्धेन
योवाहनशस्त्रलाभःपापेशराफादयशोर्थ
नाशः ४२

अथेदानीं यशःसहमस्य शुभफलेउपजात्याद् शुभेत्थ
शालीयःस्यादित्यादि यशोधिपइत्यनुवर्त्तते यशःसहमेशे शुभग्रहकृ
तमुथशिलयोगगतेअथवा शुभदृष्टे शुभयुते वा स्वकीये वा बलिष्ठे
वासति यशसोभिवृद्धिराधिक्यं स्यात् युद्धेनयःस्यात् तथावाहना
नामश्वादीनां शस्त्राणां खड्गादीनां च लाभः स्यात् अथ यशोधिपे
पापग्रहकृते इशराफयोगगते सति निर्बले वा सत्य यशोऽर्थनाशो वा
र्थनाशो द्रव्यनाशश्च स्यात् ४१

आशातदीशस्त्वथ
इत्थिष्कविवर्जितःसौम्ययुतेक्षितश्च स्या
द्वाञ्छितार्थवरवाहनादिलाभः खलेक्षायुति
तोतिदुःखं ४२

अथाशासहमस्य शुभाशुभफलमुपजात्या
ह आशेति आशासहममाशासहमस्वामी च
तौ वर्षलग्नात् षष्ठाष्टमद्वादशस्थानरहितौ सौम्यग्रहैर्युतौ वी
क्षितौ वा स्यातां तथा वाञ्छितानामर्थानामिष्टानां वराणां वस्त्राणां
वाहनानां तुरगादीनां च लाभः स्यात् यदुभयाशासहमतदीशौ
खलग्रहैर्दृष्टौ युतौ वा स्यातां तदा तिदुःखं वाञ्छितार्थस्याभावः स्या
त् ४२

मांद्याधिपेपापयुतेक्षितश्च पापःस्व
येरोगकरोविचिंत्यः चेदित्थशालीस्तपे
नम्त्सुत्तदाभवेद्धीनबलेनिकष्टात् ४३

अथरोगसहमफलं विवक्षुस्तावदशुभंफलमुपजात्याह मांद्या
धिपइति यस्मिन्ग्रहे रोगसहमं तस्याधिपः पापग्रहैर्युतो दृष्टश्च
स्यात् स्वयं च पापग्रहः स्यात् तदा रोगकरो विचिंत्यः चेन्मांद्याधिपो
वर्षलग्नाद्रष्टमाधीशेन मुथशिलं करोति तदास्तु स्यात् यदा
तद्धीनबलः याचेन रुक्तेमांद्याधिपो हीनबलश्चेत्स्यात्तदा तिक
ष्टात्तिक्लेशात् भवेत् तस्य द्वः पादि दृत्तमबलः स्यात् तदा स्वविनम्य
तुरित्यर्थः ४३

स्वस्वामिसौम्येक्षणभाग्गिमांश
येनाथेमवीर्येषडंत्यवर्जे रोगास्तदानैव
भवेद्धिमिथ्युतेक्षिते हातिभयमस्ति किंचित्

अथेदानीं रोगसहमस्यैव शुभाशुभफलमुपजात्याह खला
मीति मांद्यसद्मेखस्वामिना शुभेन पापेन वा तथा सौम्यग्रहे
रीक्षितो उपलक्षणत्वात्क्रूरेक्षितेन युतः तथा मांद्यसद्माधीशो
सवीर्यः स्वमपष्टद्वादशस्थानरहिते च सति तदा रोगो नैव भव
ति यदा तु विमिश्रैः सौम्यैः पापैर्युतो वा युतेक्षितो वा तस्मिन्काले
किंचिद्रुग्भवरोगसंभवे विभयं पीडास्यात्

अर्थाख्ये शुभनाथदृष्टिसहिते द्रव्यागमा
त्सौख्यदे पापैर्दृष्टयुते च वित्तविलयं कुर्या
त्तथा पापयुक् सद्दृष्टे च शुभेत्थशालियु
दि तत्पूर्वं धननाशयेत्पश्चादर्थसमन्ववं
च सहाख्ये व्यत्यासतो व्यत्ययः ४५

अथार्थसहमस्य शुभाशुभफलं शार्दूलविक्रीडितेनाह अर्था
ख्यमिति अर्थाख्यसद्म शुभग्रहैः स्वामिना च दृष्टं सहितं वा
तदा द्रव्यप्राप्तिः सौख्यं भवेत् पुनस्तत्केवलं पापैर्दृष्टं युतं वा चे
त्तदा तदा वित्तस्य द्रव्यस्य विलयं नाशं कुर्यात् अथैतत्सहमं पा
पयुक्तं सत्शुभैर्दृष्टं च पुनः शुभग्रहेण सहेत्थशालकृद्यदि स्या
त्तदा पूर्वमर्जितं धनं नाशयेत् इदानीमर्जितस्य धनस्य समन्वयं सु
खसहितं कुर्यात् ४५ **रिपुसद्मा रिपोर्भीतिस्तत्क्रू**
रादेर्थनक्षयः मित्रसद्मा मित्रयोगाद्धनो
मानो यशः सुखम् ४६ ॥ अथ सर्वेषु पूर्वेषु पा
पेषु शुभपापसहमा शुभाशुभफलमभिहितं तद्वद्दृष्टिर्हिया मित्र
सहमशत्रुसहमस्य तद्द्विविषयी रिपुसद्मनोः फलमनुष्टुभाह रिपु
सद्मेति स्पष्टार्थपद्यम् ४६ **यत्स्वामिदृष्टयुतमा**
त्मजसद्म लाभे स्यात्तेषां पुत्रसमं पा
पान्वितं सौम्यवीत्थशालिपाडः स्वदं पु
त्रसद्ध्वा यपश्चात् ४७ अथ भ्रातृसहमविचार
स्तु वामनेनोक्तः भ्रातृसद्मेश्वरे नष्टे तु मना शास्तदा भवेत्
तस्मिन्नस्युदिते वीर्ययुते भ्रातः शुभं भवेत् इति अथ पुत्रस
हमस्य शुभाशुभफलमिंद्रवज्रयाह यत्स्वामिदृष्टमिति पुत्र
समपुत्रसहमं स्वाहिः शुभग्रहैः स्वामिना च दृष्टं युतं वा चेत्स्यात

नी॰
२१

दात्मजस्य पुत्रस्य लाभं स्वं च पश्यति उपलक्षणत्वाच्छुभसहम
यशिलीरं तं च पुत्रसहमं स्त्रीकफलं अथ तत्र सहमपा
पग्रहैरन्वितसौम्यखेगे त्यशालं कुर्योति चेत्तदा प्रथमतः पु
त्रसमवधिः एवमनुभूय पश्चात्पुत्रसौख्यदुःस्यात् ४७

पापान्वितं पापकृतेशराफे नाशाय पुत्र
स्य गतोजसीशे सुतो सुतेशः सहमेस्य
गोष्ठे पुत्रस्य लब्धेशुभमित्रदृष्टः ४८

सुत
सहमे
स्वरः

अथ पुनः सुतसहमस्य शुभाशुभफलमिंद्रवज्रयाह पापा
न्वितमिति सुतसहमं पापग्रहान्वितं पापग्रहकृतेशराफं
चेत् पुनः पुत्रसहमाधीशो गतोजसि निर्वले सत्यमिते वा स
ति पुत्रस्य नाशाय भवति शुभदृष्टिश्चेत्परिणामे शुभं सुतो
सुतेशश्च इति अब्दवर्षप्रवेशकाले पुत्रसहमाधीश्वरः सुतो
जन्मकाले पुत्रसहमाधीश्वरः सुतो जन्मकाले सुतेशः पञ्च
मभावाधीशो रोभवेत् तादृशः शुभैर्मित्रैश्चोपलक्षणत्वा
त्स्वामिना च मित्रदृष्टः स्यात् तदा पुत्रस्य लब्धेशो भवति ४८

पित्र्यं सदीक्षितयुतं पतिशुक्रदृष्टं नास्य
यच्छति धनावरमानसौख्यं पतौ गतो जा
सिस्ते तो खलमूशरिफे नाशः पितुश्चरदे
हे परदेशया
नात् ४९

अथ पितृसहमस्य शुभाशुभफलं वसंत
तिलकयाह पित्र्यमिति पित्र्यसहमं
सद्भिः शुभग्रहैरीक्षितं युतं वा स्यात्तथा पत्या
स्वामिना शुक्रदृष्टं वा उपलक्षणत्वात् शुभग्रहैः कृतमुथशि
लं चेत्स्यात् तदा तस्य पितुर्वरमानसौख्यं यच्छति ददाति प
त्याविति पितृसहमाधीशो गतोजसि निर्वले सत्यमिते वास्त
तो वर्षलग्नादष्टमस्थाने स्थितः त्रिकभावे वा स्थिते सति
खलेन पापग्रहेण कृतमूशरिफे कृते सरा फे वा सति पितु
र्जनकस्य स्वदेशे मृत्युः स्यात् यदा पुनरष्टमस्थानं चरदहे च
स्यात्तत्र च पितृसहमाधीशो भवेत्तदा पितुः परदेशगतस्य मृ
त्युः स्यात् ४९

शुभेत्थशाले खलखेटयोगे
गदः प्रकोपः प्रथमे महान्स्यात् पश्चात्
सुखं विंदति सुगावीर्यैर्नाथेन्दपान्मान

यशोभिवृद्धिः ५ ॥ अथ शुभैरपि पितृसहमस्य शुभाशुभ
फलमप्याह । शुभैर्युत्यालादि पितृसहमे पञ्चमगताना तु
त्वात्ति तस्य भय स्कुटेत्थशाले यथा खल खेट पापग्रहे
युक्ते सति पञ्चमपर्यगृहे सदा तत्र भवेद् यशो यशस्वी पि
तृस्थाने पञ्चाद्वयोरूर्ध्वरोगपीडा मध्यमफल देविस्तीर्ण भूम
ितीयो भवतीत्यर्थः । अथवा पितृसहमाधीशस्य पीडावीर्य
वस्या विशाधिकबले सति समीचीनं स्यात् नास्ति सतो पितृ
पक्ष तस्य पत्ता तु यशोभिवृद्धिः स्यात् उपलक्षणमात्र
त्वेनायलद्रष्टव्यम् । इति श्लोकः स्वसनाथ नेपनात्यसभोव
नू अंशे वीर्यगुणेजातको सो अस्य यमनसुनि नामनोक्ते ॥

बंधनाख्यसहमे युते विलग्नाधिनाथरहित
दृष्टिवर्जितं पापखेटितं युते सबंधनप्र
पन्नेन्दुयशसोलैविशेषतः ५-

अथ बंधनसहमस्य शुभाशुभफलं परोक्ष माह । बंधना
ख्यसहमे भिन्नविधेय नसहमत्वाभिनाथुतमीलितवांउपस्व
गत्वा शुभसदृशतमीलिनवाचेत्या नतवयनकापरदृष्ट
निरोधेन यति यदा तनसिन्नथन सहमे सति विशेषेण
बंधनमति ५ । गौरवाख्यसहमे युते त्रिनेत्रा

मिलाशुभखगैः सुखालये राजगौरवय
शोवरानयः पापवीति तनुमेपरसोनः

अथ गौरवसहमस्य शुभाशुभफलमाह । गौ ५२
रवसहममिति गौरवसहमे त्रामिनाशुभयस्त्रैयुतमीलि
तवाभिनत नवामयः सुखे यद्राजगौरवयशोवरानयश्च
स्युः यदि तन्मते गौरवसहमे पापखेटैर्वीतितभवेमसांहखा
मयः स्युः यद्गौरवयशो दशमस्थाने वो पलक्षणमात्र
मापसूक्तावितनसुथार्यैलयागसहितेत्त पदस्यापिफ
रसूतानिमाशपलमणाहनमानयवनामा । स्पष्ट ५२

शुभाशुभैर्हियुते विलग्नेशोक्तेऽत्थशाले

नी॰
९२

धनमानन्नाशं संविधत्ते चरमेऽशुभेत्थशा
लेऽस्त्वविवादनशास्त्रलाभं ५३

अथ पुनरपि गौरवसहमस्य शुभाशुभफलमुपजात्याह शुभाशु
भैरिति गौरवसहमं शुभपापग्रहैर्युतं दृष्टं वा चेत्स्यात्तथा खलैः पा
पग्रहैः कृतेत्थशालं चेद्भवति तदा पूर्ववर्षस्थं वीर्यं धनमानयोर्ना
शं विधत्ते यदि तु गौरवसहमं तादृशं सत् शुभग्रहकृतेत्थशालग
तं चेत्स्यात्तदा चरमे वर्षे तनोर्हि सुखविवादने शास्त्रलाभं च विधत्ते
अत्र विचारोऽपि हृदीकायां रसालायां द्रष्टव्यः ५३

कर्मभावसहमाधिपाः शुभैः स्वामिना च
युतेत्थशालाबलान्विताः हेमवाजिगजभू
मिलाभदाः पापदृष्टियुतितोऽशुभप्रदाः

अथ कर्मसहमस्य शुभाशुभफलविवक्षुः प्रसंगात्कर्म ५४
भावस्यापि शुभाशुभफलनिरूपणार्थं योद्धतयाह कर्मभा
वेति भावश्च सहमं च अधिपौ च भावसहमाधिपाः कर्मणः
कर्मसंबंधिनो भावसहमाधिपाः कर्मभावसहमाधिपाः क
र्मभावः कर्मसहमं च तयोः स्वाधिपौ कर्मभावाधिपः कर्मस
हमाधिपश्च एते चत्वारः प्रागुक्तरीत्या बलान्विताः तथा शु
भग्रहैः स्वामिना च कृतमुथशिलाः तथोत्तरार्द्धस्य शुभस्य
दृष्टियुतितः इति तु इति पदस्यानुप्रयोजनात् शुभैः स्वामि
ना च दृष्टयुता अपि स्युस्तदा हेमसुवर्णं वाजी अश्वः गजो
हस्ती भूमिश्च एषां लाभदाः स्युः उपलक्षणत्वान्नूतनदेशपु
राणां च स्वामित्वं वा स्यात् यदा त्वेते कर्मभावसहमा
धिपाश्चत्वारः पापदृष्टापापयोगादपि उपलक्षणत्वात्पा
पग्रहकृतमुथशिलयोगगतत्वाच्चाशुभास्तदा द्रव्यना
शराजदण्डाद्यशुभफलप्रदाः स्युः ५४

दृग्याववक्राः कर्मवैकल्पदास्ते युक्ता दृष्टाः
सौरिणा ते विशेषात् राज्यभ्रंशः कोशा
नाशश्च राजकर्मेशौ चेन्मृशारिष्फोरव।

अथ पुनरप्येषां कर्मभावसहमाधिपानामशुभं लेन ५५
फलं स्फालिन्याह दृग्याइति कर्मभावसहमाधि

पापस्था: क्रूरकर्तर्यादिदोषेण सोपद्रवाः वक्रातिविपरीतगतयोपि वा
स्युः कर्मभावसहमयोर्वक्रत्वं स्वामिग्रहस्य वा तेन सम्य उपलक्षणत्वा
त्पापसंदृष्टत्वं नाहस्थत्वं वा चेत्स्यात्तदा कर्मवैकल्यं स: षोडश शुभकार्य
मेवे वैकल्यमनिष्पत्तिं सदा निनादशाः स्युः चेत्कर्मभावसहमाधि
पात्ययोरिणाशानेष्ठये शुभस्युक्ता वा स्युस्तदा विशेषात्कर्मवैकल्य
प्रदा भवेति अथ राज्यकर्मणोरानसहमकर्मसहमाधीशौ विलग्न
रिणाम्यशारिफौ कृत्तेष्वाराफयोगौ चेत्स्यातां यवनौ दृष्टौ वेत्यपि द्रष्ट
व्यम् तदा विशेषाद्राज्यभ्रंशस्य पदच्युतिः कोशनाशः सुवर्णादिद्र
व्यनाशश्च स्यात् एवं ग्रंथकृतां कियतां सहमानां नाना फलानि निमि
त्तरूपिणानि एवमन्येषामपि सहमानां फलानि विविदं दैवज्ञैः स्वबु
द्ध्योह्यानि उक्तं च एवं समस्तसहमे शुभमशुभमथ यथाशीलं लेखि
ते पुंसां ज्योतिर्विद्धिश्चिंत्यं शुभाशुभं तस्य तद्विषयमिति तस्य य
स्य वर्षफलं क्रियते तद्विषयं सहमविषयम् ५५

उपदेशो गुरुज्ञाने विद्या शास्त्रं ख्यातिः स्मृती
मोहो जाड्यं बलं सैन्यं मनो देहो जलं ख्यातिः ५६

अथ ग्रंथकृन्नीलकंठः शिष्यबुद्धिक्लेशनाय द्वंद्व परस्परविरुद्धम
नेकार्थकसहमानामर्थं विवक्षुः केषांचित्सहमानां नानि: सरि
त्पमर्थमनुष्टुभाह उपदेशेति उपदिश्यतिगायत्र्यादिक
मिति गुरुः स उपदेशो वा उच्यते यद्यपि गुरुः पिता पित्रायाचित्पम
रक्षीयोक्ति तथापि पितृसहमस्य पार्थक्येनाभिधानात्तत्र
चकता बृहस्पतिवाचकत्वेन ततः फलप्राप्तेरसंभवान्नैव संभव
ति एवं विदु दैवज्ञैः सर्वत्र स्वबुद्ध्या योजनीयः अयं तत्त्वायतेऽनेनेति
ज्ञानं शास्त्रमुच्यते शास्त्रशब्देनापि तदेवेति ज्ञात्वा ख्यातिः कीर्तिर्वेदा
दिबोध उच्यते मोत्तथी ज्ञानमिति विमर्ष्याह शास्त्र शब्देन ख्यातिः।
स्मृतीउच्येते स्मृतिर्मन्वादिप्रोक्ता जाड्यशब्देन जडस्य मूर्खस्य भा
वो जाड्यमित्युच्यते तस्य कस्यापि नेष्टमिति तस्माज्जाड्यं मोहो ग्र
यादेर्विस्मरणं अथ बलसामर्थ्ययोः पर्यायत्वेस्योत्पत्तसामर्थ्य
सैन्ये शुबलमित्यमरोक्तेः प्रसिद्धेर्थनिर्णय उच्यते सामर्थ्यसहम
स्य पृथगभिधानादत्र बलं सैन्यं ज्ञेयं सामर्थ्यं नाम शारीरबल
मत एवं वक्ष्यति सामर्थ्यं देहनाश किरिति अथ देहसहमे हस्त
पादाद्यवयवं मांसपिंडो देहश्चाद्यवाच्य स्तत्र युगपत्सर्वांगानां शु
भाशुभफलं रूपमन्यतात्संभवीत्यनुपपत्त्या देहावयवकों गाढ
द्यते ऽत उक्तमग्रे देहइति अथ जलशब्दमनुष्ये कार्यान्नामानी
निर्गणि सहमान्युक्तानि जलसहमजलपथसहमे पानीयप
तनसहमं चेति तेषां अर्थपरिच्छेदमाह जलमिति जलपथस
हमस्य तस्यार्थः जलपथा जलस्य निस्सरणमार्गः कूलो।

अपरनाम कल्पाल्पाकृत्रिमासरिदित्युक्तेः पानीयपतनार्थत्वमेव वदति ५४ **गुरुतामेदुलेशत्वं गौरवं मानशालिता निग्रहानुग्रहे विभुः राज्ञाच्छत्रादिलिंगभाक् ५७** अथान्येषामर्थनिर्णयमनुष्टुभाह गुरुतेति नतु गुरोर्भावः गुरुत्वं यदि तस्माभावस्तत्वलाविति तल्प्रत्यया गुरुशब्दात्तदा गुरुतेति रूपं भवति यदि लिंगं तादृशलघुत्वादित्याण्प्रत्ययांते तदा गौरवरूपमिति कार्यत्वमनयोः सहमयोरतः स्थगानयनमयुक्तमित्यतः स्वयमर्थभेदेनाह गुरुतेति तृतीईस्पष्टार्थलोकप्रसिद्धोयमर्थः अथ राजशब्दः क्षत्रियवाचकोस्ति राज्ञामेकादशोसेके विशामेके यथाकुलमित्यत्र दर्शनात्परंतस्मात्तस्य शुभाशुभानिर्णयो किंचित्करत्वात्सर्वजनप्रसिद्धेर्थो गृह्यते निग्रहेति सप्तार्थमनतर्हे निग्रहोन्यायिनिरोधः अनुग्रहः स्वेच्छया दिसानंतत्रविभुः समर्थः आदिशब्देचामरद्वयं तत्रराज्पतेमनुष्यमात्रसाधारणं ५७

माहात्म्यमेव गांभीर्यं धृतिश्च आदिशालिता सामर्थ्ये दक्षताशक्तिः शौर्यं यत्नारिनिग्रहः ५८ अथान्येषामर्थविर्णयमनुष्टुभाह माहात्म्यमिति महतोभावोमाहात्म्यं तत्र नानाविधमित्यन्येषां प्रकाराणाम संभवान्मन्त्रगांभीर्यमत्रमाहात्म्यशब्दार्थः प्रकांते द्विधेः सदृकार्यविचारस्तस्य गांभीर्यमप्रकाशता अथ धरणंधृतीर्यस्तस्या पनमित्यस्यार्थस्यारूपयोगादुआदिशालितार्थो धृतिशब्दस्य सामर्थ्ये दक्षताशक्तिरिति शाखाख्यातं अथशूरस्यभावःशौर्यमिति शूरो धीरस्त्रविक्रान्तइत्युक्तेर्नानार्थकत्वे मोगनेयं शूरत्वादिरर्थः प्रतीयते पितयापिप्रसिद्धेनार्थेन निर्वाहः कार्यः अरेःशत्रोर्निग्रहे स्वपुरुषार्थेन धरणातारणामारणाख्येकमेणीयत्नःशौर्यं ५८

आधिव्याधितापमांद्येषु पिंडबंधवः स्मृताः सत्यालीकं वाणिग्वृत्तिरायानप्रसवः स्मृतः ५९ अथान्येषामर्थनिर्णयमनुष्टुभाह आधिव्याधीति तापव्याधिसदृमयोः समानार्थकयोर्भेदं व्यनेतापोतदीदृः परोत्कर्षासहिष्णुतादिरूपआधिशब्दवाचः प्रसाधिर्मानसीव्यथेत्यमरोक्तेः व्याधिर्नामशारीरकृच्छ्रज्वरो रोगोज्वरादिः आधिश्चात्स्ववंधुरुदमयोर्लोके समानार्थकयोर्दर्शनाद्भेदउच्यते आतापकोदमनातः वंधववस्तु सपिंडः गोत्रजाःस्मृताः अशमरकोशः प्रमाणं अथमूलत्वाकेसत्यालीकमहदमयुक्तंतस्या

देवदत्तचिंतामणिवर्णनं वसंततिलकावृत्तेनाह आसीदि
ति एवं गुणगणविशिष्टश्चिंतामणिरासीदभूत् कीदृशः
असीमासीमानो रहिता ये गुणाः साधुत्वशास्त्रज्ञत्वपांडित्या
दयस्तैर्मंडिताः भूषिताः पंडिताः शास्त्रज्ञास्तेषां मध्येऽग्र्यः
श्रेष्ठः अथवा असीमगुणमंडितश्चासौ पंडिताग्र्यश्चेति कर्म
धारयः सकः यः भुजंगपगवीः भुजंगाः सर्पास्तान्पातिरक्ष
तीति भुजंगपः शेषनागस्तस्य गवी वाणी पस्ताः श्रीभगवत्प
तंजलिप्रपर्यायशेषनागवाणी महाभाष्यरूपाः व्याख्या
दध्यापयन् व्याकरणमहाभाष्याध्यापक इत्यर्थः । गोरतहि
तलकीति समासो नष्टनृदित्वाज्ञप्तुना । कीदृशः श्रौति
वेदज्ञत्वेति वेदत्तानासृष्टसमीचीनेष्टतमाचरणं यस्य
याकालविहितश्रौतस्मार्तकर्मानुष्ठानकरणशीलः तथा
साहित्यस्यालंकारशास्त्रस्य रीतेः परिपाटीस्तानेनिपुणः
पंडितः तथा गणितागमो ज्योतिःशास्त्रं तज्जानातीति तादृ
शः ज्योतिःशास्त्रगणितायतनवाङ्गणितागमपदं प्रायोत्ति
स्वयंवशाविशेषणमेतत् तथा विपुलगर्गनाम्नो महर्
षेः कुलवंशो गर्गकुलोत्पन्ना गर्गास्तेषामावतंसो भूष
णरूपः गार्ग्यगोत्रोत्पन्न इत्यर्थः आसीदिति असभुवि
इत्यस्माद्धातोर्लङि रूपं आप्रकथन इत्यस्माद्धातोर्लङि
अस्ति निवत्तिप्र्याति म्पोङ्-ति कृते लुङि -व्याख्यादिति रूपं

तदात्मजोऽनंतगुणोऽस्त्यनंतो योऽयो ॥६४॥
कृसडक्तीः किलकामधेनुं संतुष्टये ।
जातकपद्धतिं च न्यरूपयद्दृष्टमतीनर
स ॥६५॥

अथ क्रमप्राप्तस्य वर्णापन्नात्याह तदात्मज
इति तस्य चिंतामणिदेवज्ञस्यात्मजः पुत्रोऽनंतनामास्ति
आसीत् अस्तीति भूतार्थकस्यासीदित्यस्यार्थे तिङन्तप्र
तिरूपकमव्ययं कीदृशः अनंता गणनारहिताः गुणाः शा
स्त्रज्ञत्वादयो यस्य सः सकः यः किल निश्चितकामधेनुंका
मधेनुनाम्नः पंचांगसाधकान्ग्रंथान् यथा न्यसकृद्व्याख्यान
पूर्वकावासनाः अथो कृतवान् कामधेनुग्रंथे टीकाश्चकार
दित्यर्थः अनडुत्याख्यधेरु/येप्रक्षीत्यादिना इदेर्हिं कर्मकर्तृ
उहस्यसूत्रमो इत्यस्मादीदादिकालङ्-िन्दाश्रेगिंपिकरण
स्वशापोऽहप्रसरण इत्यस्मादीलगारवृयोगिति रूपम् पु
नः सकः यः संतुष्टये गुणग्राहिणांसंतुष्ट्यै जातकपद्धति

नी·
६५

संप्रदायानभिज्ञानां मतमसदभिप्रायं ज्ञात्वा निरस्य स्वटीकृत्या
कार्षीत् अत्र दुष्टमतनिराकरणमयौगित्यादि प्रदर्शनं च
बृहट्टीकायां रसालायां प्रतिपादितं तत्रैवावधार्यम्

**एषोबोधाय सा वितता विपश्चिच्छ्रीनीलकं
ठेन शास्त्रनिष्ठः विद्वच्छिवप्रीति
करं व्यधात्स सत्ताविवेकं सहभावततम्**

स्प

**इति श्रीनीलकण्ठज्योतिर्विद्विरचिते ६६
सत्ताने च समाप्तम् ॥ ६ ॥**

अथ कमप्रारंभस्वपूर्णानंतरं सत्ताविवेकाख्यतात्विकग्रंथ
समाप्तिमिंद्रवज्राछंदसाह एषो बोधेति एषो बोधया एषाना
मोबयामास ततो रतज्योतिर्विदः सकाशात् श्रीनीलकण्ठः श्री
शोभायामित्यादिका नया युक्तो श्रीनीलकण्ठस्तु रसो विशस्तः
पुरुषाणि गर्भविमोचनश्च तस्मात्कर्माणि ल्युट्ः तदादेशे आ
त्मनेपदे न परे विणाभावुकर्मणोरिति विकरणाश्चिणः ष्ट्या
वायादेशे च चिणो लुगिति तप्रत्ययस्य लुकि सिद्धमसा विति
रूपं कीदृशः विपश्चिद्विशेषेण पश्यश्चिनयतश्चिन्तीरा
स्वामी पंजितइत्यर्थः विद्वान्विपश्चिद्दोषज्ञ इत्यमरः पुनः की
दृशः ज्योतिर्वेदः शास्त्रं व्याकरणमीमांसाज्योतिषादितत्रा
निष्ठो निश्चगत स्तदध्यापनशीलइत्यर्थः तेन दीप्यमानाः तेः
कौशले इति धतुः अथ स तादृशो नीलकण्ठः सत्ताविवेकं स
त्ताविवेकनामकं तात्विकशास्त्रैकप्रकरणरूपं ज्योतिषग्रंथ
व्यधान्निर्मितिस्म कीदृशं विद्वच्छिवप्रीतिकरं विद्वान्पंडितः
शिवः शिवपाठकनामा माध्यंदिनशाखाध्यायी महाराष्ट्रदे
शीयो ब्राह्मणस्तस्य प्रीतिकरः संतोषप्रकरणशीलः शिष्यपा
ठकाधुनिक शिष्यार्थनयानुनाविधैः स्वावश्यं वैरिंद्रवज्राप्र
भृतिभिश्छंदोविशेषैरिमं सत्ताविवेकं व्यधात् अथ वा वेत्ति
स्तं भविष्यद्वर्तमानकालज्ञानातीति विद्वांस्त्रिकालज्ञः शि
वः सकलदुःखापनोदपूर्वककल्याणकरणशीलो महादेवः
परमेश्वरस्तस्य प्रीतिकरमीश्वरतदर्थमिमं ग्रंथं व्यधात्
ईश्वरार्पणेनैव सत्त्वशुद्धिसंभवात् अतएव क्रियाफलस्य परमे
श्वितात्परस्मैपदप्रयोगोपपन्नः पुनः कीदृशं सहभावतं
संतरुमानि सर्वमानीतानि पंचाशत्सहमानि लक्षणया प्र
तिपादको यं युः सो वतंसो भूषणं यस्य स तम् यथा वतंसः
कमलादिः कर्णस्यापि तः सन्स्त्रीणां भूषको भवति तथायं

सदमुग्रंथोऽपि सक्रमणेनैव निवेश्यमानः शुभाशुभफलकथनोपयोगि
त्वात्संज्ञाविवेकग्रंथस्यानुषक्तो नातः प्रसन्नतावतंसो वा कार्यः सूरि
पिशेखरैरधमर्षतिशिवम् ८९ आस्ति प्रशस्तधरणीसुरसंश्रयेयो
गोदावरीजलपवित्रितभूमिभागः नानाविधामणिकसुंदरनागरक
राढ्यो देशो विदर्भ इति दैवतरुम्यमुक्तः १ तत्रार्थमनगरीतिराजते स्वे
त्ताश्रजननाथयोहृता स्वीयपूर्वजनिवासभूमिकाशोभमाप्न पवि
त्रस्रातिका २ तत्राभूज्ज्ञाम्यवंशो विविधविधिविदामग्रहीरो ह्यनं
तःश्रीमद्दैवज्ञचिंतामणिरिति नयवरोऽध्यापितानेकशिष्यः सूसी
रादीशमान्यो यमतनुतविबुधानंदनं जातकीयां पद्मायो वाईके
रागवछूतसरससिरिव्याहृकाशीनिवास ३ तस्मात्समाख्यपत्न्या
ममजनि विपिचन्नीलकंठः ख्यातितः स्वाचाररत्नतनिशविजितसु
निगणः शास्त्रशास्त्रप्रवीणः त्रिस्कंधज्योतिषेयः समकृतविशारदे
स्वरानेदेरसस्तोसा ह्निपत्तानसूर्णाःस्मृतिपुचनिपुणोकक्करसेश
मान्यः ४ गोविंदश्चाहिकायां समभवदतुलो दैवविद्यपासे विश
प्रख्यातकीर्तिःस्मृतिनिपुणः सनिर्गार्ग्यवंशावतंसः त्रिस्कंधज्यो
तिषतत्त्वज्ञरणनिधिःश्रीमहाभाष्यवेत्ता योज्योतिःग्रंथकर्त्ता
नृपतिवरजहांगीरसाहातिमानः ५ श्रीदिरम्वपदांबुजन्मवि
लसद्भक्तिःख्यातितः स्मृतितातापागणिनिशास्त्रविकुरुकृपा
सप्रासविद्यागणः ज्योतिःशास्त्रविचारणापटुमतिर्दैवज्ञचूडाम
णिर्गोमत्यां समभूदितीश्वरसुतस्तस्मात्सुतोमाधवः ६ श्री
मन्त्रिमाम्मद्दकृतस्य सतानिकस्य साद्धिष्यसंघविहितार्थनया
प्रपुतः सत्यामसाकृतिगुनोपिशुवोधिनीनां संज्ञाविवेक
विवृतिं सुगमामकार्षीत् ७ सज्जनगणकवर्यो ग्रंथचेदोष
लेशस्तमखिलमपनीयप्रेमवंपूर्णेष यदिनववसनेस्या
त्मालिकासूत्रमार्थैस्तदपसरणतोह्रियाऽस्मे भासित्ति वस्त्रं ८
८ अत्तबाणशरभूमितशाके शुक्लपक्षगमुचो शिववर्यो
ग्रंथसर्ति स्वकृतार्पणात्स्मान्मह्य मिहफलस्तोगल्लनाथः ९
इतिश्रीविद्दैवज्ञसम[illegible]भूषणगोविंदज्योतिर्वित्सुतमाधव
ज्योतिर्विद्विरचितायां शिशुबोधिनीनाम्नी संज्ञाविवेकविवे
कविवृतिः संपूर्णाभवत् ॥

॥

ॐ श्रीगणेशाय नमः स्वस्त्याभिला
षं न दिन तु मीशानि विघ्नमीशान
मखाः स्वर्गौकाः विनाशसमाटकि
लयस्मनोमितु ढिराजं मातिला
भद्रेनौः १

श्रीगणेशाय नमः हेरंबं भुवनस्य शीर्षमयुलिद्धसं
मक्रपादांबुजं गौरीहृत्कमलप्रकाशनरवीणा विघ्ना
टवीपावकं हृष्यद्देरिकलात्मकं स्वमनसा श्रीकरा
सिद्धिप्रदं सिंहराक्ष्णागेंद्रयुग्ममनिशं मौलौ बधीशं
भजे १ प्रभाकरं सर्वजगत्प्रभाकरं जयी नन्द्र ब्रह्महरी
रूपात्मकं लोकस्य सृष्टिस्थितिनाशकारकं वंदे ग्रहा
धीशमभीष्टसिद्धये २ श्रीचिंतामणिदैववित्तनुभवो
नंतो द्विजन्माग्रणी भूमीमंडलशोभि भूपतिकुलैः
संमानितः सादरं ३ सर्व्वाधीशगती विचारचतुरो ग
र्गीन्वनिर्म्मीतिषे क्षेत्रादैत्य विदर्भतो वुधवरो वाराण
सीमावसत् तत्सूनुर्गीर्णाणवैकतरणिः श्रीनील
कंठो बुधोऽभूद्धेदस्मृतितर्कशास्त्रनिपुणो भूमीपमौ
लार्चितः ज्योतिःशास्त्रमिदं त्रिधा समकरोद्येनोऽस्यानं
ददं श्रीशेषाहिसरस्वतीसविहृतिं शिष्यात्सदाध्यापि
पत् ४ गोविंदपदरदपादसरोजभृंगस्तस्मादभूद्
जगराजगवीप्रवीणः ज्योतिर्नयश्च वरदी [illegible] छ्कुं
नितः श्रीगार्ग्यवंशतिलको गणकावतंसः ५ त
स्मादभूवन्ति तु येऽष्टकल्याणस्त्रयःस्वतनाज्योतिषशास्त्र
निष्ठा ज्येष्ठोऽथ नंतोऽनुजमाधवाख्यश्चिंतामणिस्तत्पर
तो विपश्चित् ६ तेषु श्रीगणनाथभक्तिविलसद्दिघा
गणो माधवः शिष्यप्रार्थनयोररीकृतवचा वासं विश्वी

कारुतो श्रीगोविंदशर्मणः प्रणम्याचरणं भोजनम्तुठेन
तोलब्धावीथलवंपिनामदकृतेनताजिकेव्याकृतिम् ॥
नीलकंठीटीकामृहतीतिमूलं तत्स्य विचारमुनिसम
तिंच हित्वाहमल्पाशिशुबोधिनीतोसमारिवेकस्यक
रोमिटीकां ८ तत्रतावत्सकलमुनिश्रेष्ठगर्गवंशावत
लकोनिखिलदेवज्ञशिरोमणिज्योतिर्विन्नीलकंठ
ज्योतिर्वित्संज्ञातंत्रवर्षतंत्रप्रश्नतंत्ररूपप्रकरणत्रयात्म
कस्यनीलकंठीताजिकशास्त्रस्यद्वितीयप्रकरणंसमावि
वेकनामकंसचःसदसत्फलोपयिकवर्षशास्त्रविचार
घनेकस्वभ्रष्टछंदसहितंचिकीर्षुरनेकजन्मोपार्जि
तदुरितसंभूतविघ्नध्वंसकामनार्थंनिर्विघ्नग्रंथस
मानिप्रचयगमनार्थंशिष्टाचारपरिपालनार्थंच
स्वकुलाराध्यतमगणेशस्तुतिरूपंमंगलमुपन्याति
कमाद् स्वस्वाभिलाषमिति अहंनीलकंठपुराण
प्रसिद्धंढुंढिराजंनौमि एणस्तौमि कृतेनतिपूर्वकत्वा
त् सामर्थ्यात्कृतेतिध्वन्यते कथंभूतंतंमतिबुद्धिलाभ
पश्चर्यप्राप्तिस्तयोर्हेतुःकारणंद्वयोःप्राप्तौबीजभूतंतं
कं यस्यढुंढिराजस्यप्रसादमनुग्रहंविनातदभावेत ६
याताःमहादेवस्तत्रस्वायंवास्तदादयःसुरैगाःदेवसंघाः
निर्विघ्नंयथास्यात्तथास्वस्वाभिलाषंस्वीयस्वीयमनो
रथंलब्धुमीशाःसमर्थाहिनिश्चयेननैवंभवतिकिल
पुराणादौश्रूयतेऽतोगणेशस्यस्तुतिस्तावन्निरूपितैव

जातकोदितदशाफलंयतःस्थूल
कालफलदंस्फुटंन्नणां नचनेस्फु
रतिदैवविन्मतिस्तत्कुवेऽब्दफलमा
दिताजिकात् २ ॥ २ ॥

सदसत्फलावबोधार्थमस्यताजिकशास्त्रस्यप्रवृत्ति

मी॰
३२

ः ग्रादिजन्मग्रहाधीनातदंगीकार्येवजातकशास्त्रादेवत्त
णास्मदसत्फलाववोधोभविष्यति किमनेनताजिकशा
स्त्रेणात्याशंक्याउक्तंतादृशमानरमाह जातकोदितेति य
तोयस्मात्कारणाज्जातकेजातकशास्त्रेउदितं यद्दशाफलं
ग्रहदशांतर्दशाफलंतत्त्वाणास्थलेनबहुवर्षात्मकेनकाले
नफलाफलप्रदंस्फुटंभवेत् अयमर्थः जन्मकालेहि
स्पष्टग्रहेभ्यःस्पष्टबलान्यानीयग्रहाणांआनीयततद्ग्रहा
णामायुर्वर्षाणि दशारूपाण्यनीतानिजातकंपद्धति
कर्त्तृभिस्तदानयनबहुनाकालेनगणितविदामेवसा
ध्यंनेयोग्याणांतादृशानांतांअदेशाबहुवर्षात्मिकाः
द्वादशवर्षात्मिकाःपंचदशवर्षात्मिकाःसंभवंतिपुन
स्तत्राप्यंतर्दशावर्षाण्यपिबहुवर्षात्मिकानिसंभवं
ति ततोविदशावर्षाण्यपिबहुवर्षात्मिकानिस्युरि
ति बहुकाष्टसाध्यत्वाद्बहुकालसाध्यत्वाच्चगणिता
गतदशाफलंस्थूलकालफलदंएतस्मिन्समयावच्छि
न्नेकालेजातकोदितंफलंस्यात् तथासतिदैववि
न्मतिर्न्नोतिर्विन्मातिबुद्धिस्तत्रस्थूलेकल्पवर्षेकस्मि
न्मासेवा दृष्टंशुभमशुभंवाफलंभविष्यति नस्फु
रति पुरःस्फूर्तिकानभवति तस्मात्कारणात्स्मा न
दिताजिकात्स्वल्पेपिपंचमी जीर्णताजिकशास्त्रंद
— दृक्फलमिदानींतद्वर्षसंबंधिशुभाशुभफलंध्रुवेव
क्षिशिष्यामीतिशेषः वर्षादेशींककर्मकत्वात्

गताःसमाःपरयुताःशकेनिघ्नस
माग्रणात् खवेदाभवटीयुक्ताज
न्मवारादिसयुताः ॥३॥

अस्मादिपदेन
दृष्टकालस
टीपलानि
नतु वास

अथवर्षफलसाधनार्थंप्रवृत्तोयंथकृत्ततत्साधनीभूत
वर्षप्रवृत्तिसमयस्यानयनार्थानुष्टुभाह गताःसमाइति
गताअतीताःसमाःवर्षाःस्वजन्मकालादतीताश्च:

पादेनवत्वर्षांशायुताः कार्य्यास्तेंकाश्च दिनघ्रआदि
काःस्युः पुनरपि प्रत्नत्येकविंशोत्थाहन्यतेगुणपते
नारश्यात्समागणावर्षगणात्खवेदाप्तताशिता
भक्तावशमघ्रदटिकादितेन प्रोक्तावांशकाङ्कटीस्या
नासैर्युताः कार्याःपुनर्जन्मकालीनवारघटीकापलैः
क्रमेणायुताःएवंक्रियमाणेयश्चार्यकस्तस्मिन्समत
ष्टेसप्तभक्तावशिष्टेसत्यवाशिष्टमवप्रवेशेवारादिवा
रघटिकापलात्मकंनिर्दिशेदैवज्ञः अथोदाहरणाम्
गताःसमाःपास्युताः ३४ आसांचतुर्थांशः ८।३। अ
नेनयुताः ४२।३।०।०। जातावर्षादिकाशांशाः पुनःसमा
गणाः ३४ प्रकृतिघ्नः २१ एकविंशत्याग्रणितः ७१४
खवेदैः ४० भक्तंलब्धंघटिकादि १७।५१ अनेनयुक्ता ४२
।४७।५१ जन्मवारघटीफलैः ५।५२।३। पुनरप्यन्विताः
४५।४४।१२। अत्राद्यंके ४५। सप्त ७ भक्तेऽवशिष्टं ४ वर्षप्र
वेशादिनेवारादिश्चदंजातं ४।४४।१२। यथा संवत् १८९०
शाके १७५५ समयेआषाढमासे शुक्लपक्षे चतुर्दशी
तिथिः १४ बुधे ११।५१ उपरिपूर्णिमा पूर्वाषाढानक्षत्र
२।५४ उपर्युत्तराषाढानक्षत्रंविष्कुंभयोगः ३८।३३
अत्रदिनेश्रीसूर्योदयाद्गतघटिकाः ४ पलानि २१
समयेऽभलग्नेममामाथवस्यवर्षः ३४ प्रवेशोभवत्

अब्दप्रवेशे वारादिंसमतष्टं निर्दि
शेत् शिवघ्नाब्दैःखखाद्रीद्दलवा
॥ द्यःखाग्निशेषतः ५

खाग्निभक्तेस
तियच्छेषः

अथवर्षप्रवेशे यतिथिस्तानमनुष्टुभाह शिवघ्न
ति अब्दोवर्षगणाः शिवाएकादशभिर्गुणिताः द्वितीय
यस्यानस्यापि तस्यास्यत्वंशेडलवेन सप्तत्यधिकश
तेन १७० भागेहृते यल्लब्धंतेनाद्योयुक्तः कार्यः जन्म

केलिकाभिः युक्ता गतिपदाम्भ तिथिरन्वितः पञ्चाग्नि त्रिंशतात्शोधितोभक्ताऽवशिष्टः कृतस्तत्रतस्यां तिथावब्दस्य वर्षस्य प्रवेशनं स्यात् उदाहरणं ग्रहगणः ३४ एकादशगणितः ३७४ स्वाङ्गेड १०॰ भक्तोलब्धं २ अनेन युक्तः ३७६ जन्मकालगततिथिभिः २८ अन्वितः ५०५ खाग्निभक्तावशिष्टः १५ पूर्णिमायां वर्षप्रवेशोजातः यदा खलु तिथिस्वादस्तथा सेकृता वा कार्य्येत्येवपरम् ५

पंचदशपर्यंतं यस्य तिथि ... तत्र पञ्चानू ...

जन्मतिथ्यान्वितस्तत्रतिथावब्दप्रवेशनं तत्कालेर्कोजन्मकालरविणास्याद्यतः सम

अथायमेव वर्षप्रवेशसमय उत्पन्नार्थे प्रमाणाम मः ॥ तत्पूर्वर्द्धेनाह तत्कालेइति यतो यस्मात्कारणात् वर्षप्रवेशसमयेस्पष्टाधीनकरणा सिद्धान्तोक्त रीत्या साधितेनाव श्यं समो राश्यंशकलाविकलाभिस्तुल्यः स्यात् इदमेव वर्षप्रमाणगणितविदां सुगमतरं ५

एकैकराशिवृद्ध्यावेत्स्यांशाद्येर्यदारविः तदामासप्रवेशः

अथ यद्यंया **स्यात् प्रवेशश्चैतल्लासमः** तेमासफलं वस्तुनि नरस्थेमब्दप्रवेशप्रकरणान्मासप्रवेशोस्ति प्रवेशयोरानेयनमत्रैवानुष्टभाह एकैकेति जन्मकालिकोवर्षप्रवेशकालिकोवा सूर्यो यादृशोराश्यादिरस्ति सएकादशधा स्थाप्य एकाहिनीत्याकया एकैकराशिवृद्ध्याराशिस्थानेयुक्तोयया वा स्थितोंशादितुल्यः

सूर्यो यदा यस्मिन्मासमध्ये पलात्मके काले भवति।
तत्तत्सात्मको मासप्रवेशो ज्ञेयः अनेन मासप्रवेशः
सौरदिनात्मको भवति अथ दिनप्रवेशः केचित्त्विकी
र्षिसमशस्सूर्य प्रत्यहमेकांशयोजनात्मके वलक ताभिः
समन्तं सूर्यं स्पष्ट यस्मिन्दिने यो स्पष्ट राशौ प्रवेशो भवति मा
सप्रवेशाद्दिनप्रवेशयोरहरहरघोतमेव वत्पते अथ
दिनप्रवेशो प्रपत्तिमूलवाक्योपपत्तिसहितान् याति
प्पानेयनोपपत्तिस्तया वर्षप्रवेशमासप्रवेशदिनप्र
वेशाः स्पष्टस्तथैव सोऽन्ये नवा संचारनीया एवं विधेऽस
दि ग्यार्थं सर्वं पतोऽत्र ततस्त समाधानप्रकाराद्वैतमस
र्थकं स्वकेमहनाश्र यसरभैणास्फटत्वरणकृता
यो यदर्शीकाया रसाज्ञता मिया या लिखितम ल्लिम्बे
उणार्थारिभि विद्वद्वै वज्ञैगलसमल्ल राशयदापावली
कनीयम् ९। तात्कालिकात्तत्त्ववशाः नत्वा दि
स्वयियाविधेयाः सपदिवलनमाव।
भाववर्गाविधेयः वीर्यं तथा कवि
यिनानिविलयं हरणामनोर्यपस्य
विधयैकय यामिथुकि मू। ७
एवं वर्षोत्पत्तिमानीया शिमा कर्मस्थला च सततिल्लकाखे
रसादे नाकालिका इति सम्बन्धं पर्यन्त राज्यनप्रकारस्त
द्धत्यकर्यात्सम्बा ग्रहत्वेन उदाहरणार्थंग्रहभाववल
रस्मानयवं मार्गवकृत्वा लिखितमास्ति मया ७
जन्मलग्न पतिं रखलग्नपोवं यदाति।
पतिमत्रिणांसिपः सूर्यराशीपतिर्यदि

चंद्रभाधीश्वरोनिशि विमृश्यपंचकं

[illegible]

अथाद्यपनिर्णयार्थं पंचारयोक्तयाह जन्मलग्नपतिरिति
स्पष्टार्थं पद्यं त्रिराशिपाः सूर्यसितार्किशुक्रा इत्यादिना त्रै
राशिकेश्वरा उक्ताः स्वजन्मलग्नं रवितश्च यातं शरद्युतं साभ्
मुखेंथिहास्यादिति वक्ष्यमाणमुथहा तस्याः अन्यत्स्पष्टं ८

बलीयएषां तनुमीक्षमाणं स वर्षपो।
लग्नमनीक्षमाणः नैवाब्दपो दृष्ट्यति
रेकतःस्याद्बलसाम्ये विदुरेवमाद्याः

एवं पंचाधिकारेनिर्णीयेद्यपतिनिर्णयमुपजातया ह
द्बलीय इति एषां पंचानामधिकारिणां मध्ये यो बली
यग्रहः स पंचवर्गीबलाधिकः सन् मूर्त्यस्य दृष्ट्या तनुल
ग्नमीक्षमाणः स वर्षपो ज्ञेयः यदा तु नर्लग्नमनीक्षमाणः
सबलोप्यब्दपो नैव भवति यदा तु पंचानामपि बलसाम्य
त्वं स—मपि सर्वग्रहदृष्ट्यातिरेकतः यस्य ग्रहस्य दृष्टिरधि
का सवर्षाधीशो भवेत् स्थानकृतमस्थानकृतं वागणि
तागतं दृष्टिमूर्त्यस्त्वद्रष्टव्यम् ९

दृगादिसाम्येप्यथ निर्बलत्वं वर्षाधि
पःस्यान्मुथहेश्वरस्तु पंचापिचेन्नो
तनुमीक्षमाणा वीर्याधिकोब्दस्य वि
भुर्विचिंत्यः १०

अथ यदा गणनया पंचानामधिका
रिणां दृष्टिसाम्यं बलसाम्यं वा स्यात् तथाहीनबलः शरी
नश्चेके निर्बलत्वं वा स्यात् तदा कोब्दपतिरित्युपजाति
काद्ध्वीहेनाह दृगादिसाम्य इति सर्वेषां दृष्टिसाम्ये
ऽप्यादिशब्दाद्बलसाम्येपि अथवा निर्बलत्वे मुथेश्वर ए
व वर्षाधिपः स्यात् अथ पंचाधिकारिणः सबला अपि

लग्नं पश्यंति तदा कोऽपि पतिरित्थपजानि उत्तरार्द्धेनाह रूपं चा
पीति चेत्पंचाधिकारिणो लग्नं नो पश्यंति तदा बलगण
नया यस्यैव बलमधिकं स एवाब्दस्य विभुः स्वामी वर्षाधि
पो विचिंत्यः ॥ १५ ॥ बलादिसाम्ये रविराशिपो
ह्नि निशीन्दुराशाधिपतिं विदाहुः ये
नेत्थशालोऽपि विभुः स राशीसवर्षाधि
पस्त्विंदुभयपोऽन्यथा ते ॥

अथ ह्यबलयोः साम्ये कोऽपि पतिरित्थपजानि स्वार्द्धेनाह ब
लादिसाम्ये इति आदिशब्देन दृष्टिसाम्ये च तस्मादिने वर्ष
प्रवेशश्चेत् तदा सूर्याक्रांतराशिस्वामी वर्षाधिपः स्यात्
निशि रात्रौ वर्षप्रवेशश्चेत्तदा तात्कालिकचंद्राक्रांतराशी
श्वरो वर्षाधिपः इति केचिदूचुः अथ रव्यादीनामनुपत्वा
निर्णयोऽनया विधिना कदाचिच्चंद्रस्यापि वर्षाधिपत्वेमाग
च्छेत्तदा विशेषमपजानस्तु उत्तरार्द्धेनाह येनेति यदि प्रागुक्त
रीत्याऽब्दविभुः राशीजातः सर्वाधिपो नज्ञेयः किंतु वर्षा
धीशाच्चंद्रो येन पंचाधिकारिमध्यास्थितेन ग्रहेण सहेत्थ
शालकृत्यशीलं वा स्यात्स ग्रहो वर्षाधिपो ज्ञेयः यदा तु सवर्षा
धीशश्चंद्रो येन पंचाधिकारिमध्यास्थितेन ग्रहेण सहेत्थ
शालवांश्चो भय इति अन्यथा त्वचंद्रस्य केनापि सहेमुत्थ
शिलयोगाभावसत्वे चंद्रभयः चंद्राक्रांतराशीशश्च रवो वर्षा
धीशो रव्यादिः स्यात् तत्र यदा चंद्राक्रांतराशिः कर्कट एव स
भवेत्तदा चंद्र एव वर्षाधीश इत्यर्थः अत एव वक्ष्यमाणान्यब्द
पचंद्रफलानि संगतानि भवंति ॥

अब्दाधिपो व्ययषडष्टमभिन्नसंस्थो ला
भोदयोऽब्दजनुषोः स्वदृशा बलेन निः

स्त्री.
५

रोषं मत्तमकल्विदयातिकोपमेहव्यरा
मवललाडिरनीवसोरव्यं १२

अथैवं तिथीतस्याहृक्ष एयादेःशामान्यफलं वसंतातिकेलेया
द अथुपिपरति स्पष्टार्थपयम् अरुअगुणोऽतिपर्वोरि
च्लीसीप्रमायेनोभयश्चापि संवध्यते यथाऽक्ष्वनुषीलवा
रयो वनेतस्थो श्रीविजयशिजन्मकाले १२

वलस्यो हृपे स्थो शुभं मध्येवमध्यम्
मधमेऽःखशोकारिभयानि विविधाः

अथैवमवृपस्य सामान्यफलमुक्त्वा गणितानुव
गोहनम मध्यम प्रकृष्टैर्वलैर्युक्तस्य विशेष
फलमहुअमाह वलस्थोइति स्पष्टार्थम् स्वीक
जमितिशेषस्य स्पष्टीकृतम् १३

वर्षेश्वरः स्वोच्चभमित्रराशौ विवीर्
स्यान्तगतोऽर्यसिद्धे सुर्येहृपे वलि
निराज्यसुखात्मजार्थलाभः कलो
वितश्च वः परिवारसौख्यम् १४ ॥
वंयशोरहस्वविविधार्थशेषा
३विनयपतिफलकानि विदुस्तरा १५

अथैवं तिथिविशेष वशुतानां ध्याद्वीनां प्रत्येकं फलानिसे
कविंशति वसंतातिलकाभिर्विवक्षुः सन्नादौ सूर्यवरस्य
रूपस्य हर्षस्य फलमाह सूर्येइति स्पष्टार्थम् पच्चछवि
रेवरुनौतिदं फलं जन्मकालीनग्रहाधीनतया वा व्यम्
य यावर्षपोग्रहीय दिजन्मकाले वलस्था नगतः शुभयस्ता
वनो किंतञ्ज सन्नीचपञ्चवेवा दिगतो नभवेन्नशुभव

र्षफलमविकलं स्यान्नान्यथा तथा जन्मकाले वर्षपत्र
हीडश्स्थानगतः सन् नीचशत्रुक्षेत्रादिगतो भवेत्तदा वर्षफ
लमशुभतरं वाच्यम् मिश्रं फलमत एव युक्तोति पदं प्रायो।
ऽपि १४

मध्ये रवौ फलमिदं निखिलं तु म
ध्यं स्वल्पसुखं स्वजनतोपि विवादभाक्
स्यान च्युतिर्न च सुहृद्विकृतिस्तथापि देहे
भीतिर्नृपात्तु मुथशीलो न शुभेन चे
त्स्यात् १५ अथ मध्यबलस्याब्दपसूर्यस्य फलम
शुभतरं वाच्यं मिश्रत्वे मिश्रं फलमत एव युक्तेति पदं प्रयोज्य
माह मध्य इति स्पष्टार्थं परं इदं पूर्वपद्योक्तं उपलक्षणात्वा
स्वज्ञातिभ्यः स्वजनतोल्पसुखं न गुणामित्यपि द्रष्टव्यं नाति
कस्मादित्युक्तं मुथशील इति सूर्यस्य शुभग्रहेणासह मुथशि
लयोगश्चेन्न स्यात् तदेदं फलमविकलं यदि तु मुथशीलं स्या
त्तदा फलं शुभतरमित्यर्थः।

सूर्ये बलेन रहिते
नृपतो विदेशयानं धनक्षयश्च वैरिभि
र्येचतद्वा लोकापवादभयमस्य रुजो
तिदुःखं पिशाचितो न हि सुखं स्वजनमित्र
भीतिः १६
अथ निकृष्टबलस्याब्दपरवेः फलं सूर्ये
इति स्पष्टार्थं पद्यम् इदमेव फलं नष्टबलस्यापि द्रष्टव्यम् १६

चंद्रेऽब्दपे मुथशिलीये नासावब्दपोस्य
चेत् कंबूलमिंदुना जन्मनि शिवं वर्षे त
दोत्तमम् १७ अथ चंद्रस्याब्दपस्य त्रिविधफलानि
विवक्षुः कंबूलयोगविशेषमनुष्टुभाह चंद्र इति प्रागुक्तया
बलीयः पञ्चानुमीतमाणः से वर्षप इति रीत्या चंद्रस्य
वर्षाधिपत्वे निश्चिते सति चंद्रो येन पंचाधिकारिमध्य
स्थितेन ग्रहेण मुथशिलं करोति सोऽब्दपो ज्ञेय इति प्रागु

नी॰
९

कस्मात्तु वादो विशेषोक्तोऽर्थं तं वदति तादृशस्य ग्रहस्य चेद्दृङ्गना
चंद्रेण सह केन्द्रूलयोगः स्यात्तथा देवदत्तादेर्जन्म निशि रात्रौ च
स्यात्तदा तस्य वर्षपस्य यादृशा तादृशा बलाक्रांतस्य वर्षे वर्षे फ
लं उत्तमम् उत्कृष्टफलदं स्यात् स्पर्शबलं तून ममैवेतद्धर्षं य
दाह्न दिने जन्म तदा सत्यपि केन्द्रूलयोगे तादृशा वर्षपस्य वा
चनिकमेव फलम् ॥ १७

वीर्यान्विते शशिनि
वित्तकलत्रपुत्रमित्रालयादिविविधस
खभाङ्गयोः स्वर्णगंधमौक्तिकदुकूल
सत्वानिभूतिलाभः कुलोचितपदस्य
त्रपैः सवि
त्व १८

अथ प्राप्तक्रप्रकाराभावे चन्द्रस्यैवाह्वर्षपत्व
निर्णीते सत्युत्तमबलस्य चंद्रस्य फलमाह वीर्यान्वि
त इति स्पष्टार्थम् पद्यं १८

वर्षाधिपे शशिनि मध्यबले फलानि
मध्यान्यमूनि रिपुतासहनमित्रवर्गे
स्थानान्तरे गतिरथो क्रशता शरीरे श्ले
ष्मोद्भवश्च यदि पापकृतेशराफः १९

अथ मध्यबलस्याब्दपस्य पापकृतेशराफयोगश्चेत्स्यात्तदा
श्लेष्मोद्भवः स्यात् इत्यादियुक्तिवशान्नानाविधानि फला
न्युक्तानि विद्वद्वत्सैः १९

नष्टेऽब्दपे शशिनि शीतकफादिरोगस्रो
तादिभीः स्वजनविग्रहमप्युशन्ति हृद्वे
गतिः सुतकलत्रसुखाल्पयशस्याप्त्यस्त
त्वल्पमतिहीनबले शशाङ्के २०

अथ निकृष्टबलस्याब्दपस्य चंद्रस्य फलमाह नष्टेऽति न
ष्टेऽल्पबलेऽब्दनाथे चंद्रस्तदल्पफलमित्याध्याहारः अन्यत्स्प
ष्टार्थम् २०

भौमेऽब्दपे बलिनि कीर्तिजयाभिमा
नः सेनापतित्वरणनायकताप्रतिष्ठाः
लाभः कुलोचितधनस्य नमस्यतापि
लोकेषु मित्रसुतवित्तकलत्रसौख्यं २१

अथ पूर्णबलस्याह्नपभौमस्य फलमाह भौम इति स्पष्टार्थम् २१

मध्येऽह्नपे वनिसुतेहयगिरुक्षतिश्च कोपो
पिको रुककटशास्त्रहतिललनानि स्वामि
त्वमात्मगणतो बलगोऽत्र वचम ध्येसुत्वे
अथ मध्यबलस्याह्न निखिलमुक्तफलं विचिंत्य
पस्य वंइस्य फलमाह २२
मध्य इति स्पष्टार्थम् फेवकः कलहः ततावि स्फोटका
दिनानि निखिलं प्राक्पूर्वे उक्तमत्र मध्यफलत्वे न विचिंत्य २२

हीनेऽह्नपे स्मृतिमयं रिपुतस्कराग्निलोका
पवादभवमात्मधियां विनाशः कार्यस
विघ्नगतिरोगभयाविदेशयानं तपोप
नयतो गुरुह शुभावे २३

अथ निकृष्टबलस्याह्नपभौमस्य फलमाह हीन इति अ
स्तिभौमेवि षक्त्वर्वतः कार्यस्य विनाशः अपनयनो ऽनी
ततयोऽद्यादेर्गुरोः दृष्टस्यतेर्दृष्टुभावे पूर्वमिदं यथोक्तं स्या
तद्दृष्टिस्तत्वेन सर्वं फलं शुभादिकं स्यात् अन्यत् स्पष्टार्थम्

सौम्येऽह्नपे बलवति प्रतिवादलेख्ये सकृा
सुसखी वहतो विजयार्थलाभः स्नानेक
लागणितवैद्यभवं गुरुत्वं राज्याश्रयेण
न्पतान्त्यपमं वितानवा २४ पूर्णबलस्याह्नप
स्य बुधस्य फलमाह सौम्य इति सोमस्यापत्यं सौम्यं बुधस्त
स्मिन्प्रतिवादे हि शेषेण सह कलहः स्पष्टार्थम् २५

अह्नाधिपे शशिसुते बलमध्यवीर्यस्या
न्मध्यमं निखिलमेतदथ यानं वाणिज्य
वर्तनमथात्मजामित्रसौख्यं सौम्येऽथ शा
लवशतो परथा न सम्यक् २६

पा

अथ मध्यबलस्याह्नपबुधस्य फलमाह ~~सौम्य इति सोमस्य~~

अद्यापिपइति एतान्निखिलंप्राक्पद्योक्तं वाणिज्येनवाणिज्य
मेणाक्रयविक्रयावर्तनेनजीवनं सौम्येनचंद्रगुरुशुक्राणाम
ध्येयेनकेनापिसहत्थस्यसहथशीलचेत्स्यात्तदाप्रागुक्तंफल
मुत्कृष्टमध्यमंचोत्तमतरस्वतमवास्यात्अपरथा॰न्यथान
सम्यगशुभंस्यात् २५ सौम्येऽहपेऽधमबलेब
लवृद्धिहानियमेतयः परिभवोनिजवा।
क्यदोषात् निर्लेपतोविपदतोवसुषेवा
सादाहानिः पदव्यवहतेःसुनवित्तमिह
अथतिकृष्टबलस्यात्यपत्थस्यफलमाह सौम्यइति २६
स्पष्टार्थंपद्यम् २६ जीवेऽहपेवलयुतेपरिवार
सौख्यंधर्मोगुणाय हिलताधनकीर्तिवृ
द्धः विश्वासताजगतिस॰न्मतिविक्र
याणिलाभोनिथेन्दुपतिगोरवमप्यरि
ष्टं २७ अथपूर्णबलस्याहपगुरोः फलमाह जीवइति
स्पष्टार्थम् पद्यम् ॥ २७ जीवगुरौगुणोऽविद्या
दौर्यादिधयद्रव्याग्रहोयस्यासौगुणाद्या हिलनाल्लसमानः
स्तनलोमादित्यादिनापिञ्छादित्वादिलच् २७॥
अद्यापिपेहरगुरौकिलमध्यवीर्येस्या
न्मध्यमंफलमिदंनृपसंगमश्च वित्ता
नशास्त्वपरताप्यशुभेशराफेदारिद्र्य
मर्थविलयश्चकलत्रपीडा २८
अथमध्यमबलस्याहपगुरोःफलमाह अद्यापिपइति इदं
फलंपूर्वपद्योक्तं यदेगुरोःशुभेनपापेनवासहमुथशि
लस्तदोक्तंफलमुत्तममेवस्याद्यदात्तपापयहेणासहेशरा
फयोगस्तदादारिद्र्यादिपीडाशुभेशराफेमध्यमं २८
जीवेऽहपेधमबलेधनमर्थसौख्यंहानिस्त
जेतिसुतमित्रजनाःसभार्याः लोकाप
वादभयमाकलतातिकष्टंनित्यंनोक
फहजोरिपुभिःकलिश्च २९

अथ निकृष्टबलाढ्यगुरोः फलमाह जीवइति स्पष्टार्थं पद्यम् २९

शुक्रे नृपे बलिनि नीरुजताविलासः सद्वस्त्र रत्नमधुराशनभोगतोषाः तेमभजनाय । विजयो वनिताविलासो हास्यं नृपाश्रयव शेन यतनं ह्यवं च ३०

अथ पूर्णबलस्याढ्यशुक्रस्य फलमाह शुक्र इति स्पष्टार्थं पद्यम् नीरुजता रोगराहित्यम् ३०

अढ्याधिपे स्फुरति हने खलमध्यवीर्ये मध्यंफ लं निखिलमेतदथाल्पदृतिः शुभं च इःख माखिलं हनि वहद्दतिः पापारिवर्तितन ये विपदोर्थनाशः ३१

अथ मध्यमबलस्याढ्यप शुक्रस्य फलमाह शुक्राढ्यपइति एतत्पूर्वपद्योक्तं अल्पदृतिः । स्वल्पया भूम्या कायावनीते शुभे मानसे इःखमखिलं वाच्यमवा यंच स्वनिवद्धा सर्वतो निष्टतो दृताद्दति नीचनो पायो यस्य य दा शुक्रे पापग्रहेण न्यारिणा शत्रुणा वा विवर्तितेवाशुतेवास तिविपदोइ अनाशश्च स्यात् यदा तु शुभग्रहेण मित्रेण वावि वर्तिते युक्ते वा सति सर्वं फलं शुभोदर्कं स्यात् ३१

शुक्रे नृपेधमबले मनसोतितापो लोका पवादसविपदो निजवृत्तिनाशः द्वेषः कल त्रसुतमित्रजने षुकष्टादन्नाशनं च विफ लीक्रियतां न सौख्यं ३२

अथ निकृष्टबलस्याढ्य प शुक्रस्य फलमाह शुक्र इति स्पष्टार्थं पद्यम् ३२

मंदे नृपे बलिनि नूतनभूमिवेश्मदेशाभि र्थनिचयो यवनावनीशात् आरामति मितजलाशयसौख्यमंगपुष्टिः कुलोचि

नी॰
८

तपदासिगणायणीते ३३

अथस्त्रीबलस्याद्रूपशानैःफलमाह मंदइति यत्नस्यासो
श्रवनीयाप्तस्माद्यत्नजातीयाइतः आश्रमउपवनजलाश
यस्तगणादिगणायणीतस्मदायेसोखप्रथमाहिवचनां
त ३३

अशाधिपैरविस्ते खलमध्यवीर्यैम
ध्यफलंनिखिलमन्नमुनिस्तकष्टात् दा
सोष्टमाहिषकुयान्यतेस्वलाभःपापेफ
लंभवतिपापयुगीतणेन ३४ ॥

अथमध्यमबलस्याद्रूपशानेःफलमाह अशाधिपइतिस्पष्टार्थं
पद्यफलपूर्वपद्योक्तं अत्रशानेःपापग्रहयुतिदृष्टिभ्यांउष्टमा
निष्टफलंस्यात् यदात्र शुभग्रहयुतिदृष्टिःस्यात्तांतदाभाग
क्तंफलंशुभोदर्कस्यात् ३४ ॥

मंदेबलेनरहितेद्रूपनोक्रियाणांवंध्यतमा
र्थबलयोविपदोरिभीतिः स्त्रीपुत्रमित्रज
नवैरकदन्नभुक्तसौम्येन्यशालयुतिसौख
मपीषदाहुः ३५

अथानिकृष्टबलस्याद्रूपशानेःफलमाह
मंदइति स्पष्टार्थपद्यम् यदाशानौकेनापिसौम्यग्रहेणान्यशा
लयुनिसतीईषत्त्वल्पसौख्यमप्याहुः यदात्वसौम्यग्रहेण
सहेशराफोयोगोवापापग्रहेणसहेत्यशालोवेशराफयोगो
वातदातिकष्टमित्यर्थतःसिद्धं अत्रसामान्यतःसर्वेषांग्रहा
णांस्थानविशेषास्थितमादिफलमुक्तंताजिकसारे सद्यो
वगेशपरिस्तीफलंस्वगेपुह्याद्भिमागकनवांशगतेशुभमध्यं
नीचारिवेश्मसहितेशनिकृष्टवीर्यमस्तारिगेशुखलनष्टफ
लंसमंस्यादितिस्पष्टार्थंसमनिस्वगृहेसमाणावर्षे ३५

वर्षेश्वरोभवतियःसदशाधिपोहिन्नेयोबु
लेहजन्मपोविलमस्यवितं वीर्यान्वितैत्र
निखिलंशुभमहमाहुहीनेत्वनिष्टफल
तासमतोसमते ३६

अथैवं ग्रहाणां वर्षपतीनां त्रिविधं फलमुक्तमिदानीं तस्य व
र्षेश्वरः स सर्वग्रहदशाधिपो भवति सर्वग्रहदशाफलेषु
वर्षपतेरपि दशाफलं किंचित्किंचित्स्यादिति यथा वृद्धदेश
प्रभोरल्पदेशप्रभुः स्वात्ताकारित्वरूपं स्वामित्वमस्तीति यावत्
न तु वक्ष्यमाणहीनांशक्रमेण सर्वा दशाः समाना यत्र वर्षपते
राधारदशेत्यर्थः तस्य वर्षपतेरब्दजन्मनोर्वर्षकाले जन्मकाल
योः पंचवर्गीबलं विचार्य प्रागुक्तादशा जन्मकालेपि पंचव
र्गीबलं कार्यमित्यर्थः फलविशेषमाह अत्र वर्षपतावब्द
जन्मकालयोः पूर्णवीर्याविति गविलं सौरद्वादशमासात्ता
निकमब्दस्य शुभं शुभतरं स्यात् एवं वर्षजन्मनोरब्दपतेर्मध्य
बलत्वे समता स्यात्स पूर्णं वर्षं मध्यकर्षापकर्षहीनमाहुः
एवमेव वर्षजन्मनोरब्दपतेर्हीनेनिकृष्टबलत्वे निखिलम
ब्दमनिष्टदुःखमाहुः ग्रंथकर्तास्वदीनुरोधात् हीनत्वनिष्टफ
लतासमता समत्वस्युक्तं अस्माभिस्तु पावकमारथक
मोबलीयानिति न्यायमत्वा वित्य क्रमेण व्याकृतं यदि होरं
त्वहोति यवाग्रूपवतीति श्रौतवाक्यवत् ३६ ॥

येनेत्यशालोब्दपतेर्ग्रहोसौ स्वीयस्वभावात्स्वफलं ददाति शुभेशराफे शुभमस्ति किंचिदनिष्टमेवाशुभमूशरीफे ३७

अथ पुनरब्दपतेः सकाशाद्यौक्तिकमर्थमुपजातिकयाह ये
नेति वर्षपतेर्ग्रहस्य येन ग्रहेण सहेत्यशालयोगोस्य सोग्र
हः स्वीयस्वभावात् शुभत्व पापत्वस्वभावाद्रूपलक्षणात्वा
ताबलत्व निर्बलत्वाभ्यां च स्वफलं समीचीनफलं पुष्टमथ
मंदं स्वल्पं वा ददाति ननु यथाशीलयोगो नास्ति किंत्वीशराफ
योगोस्तीति तदा किं स्यादित्यत आह शुभेशराफ इति यदा
वर्षपतेः शुभग्रहेण सहेशराफयोगे सति तदा किंचिच्छुभं किं
चिदशुभमपीत्यप्यूह्यं यदि पापग्रहेण सह वर्षपतेरीशरा
राफेत्यनिष्टमेव स्यात् ३७ **हद्देया द्वादशांशपः खे
टः स्याद्यतेत्र चयोमदः जन्मन्यब्दे च ता**

वर्षकाले

येनेत्यशाल इत्यर्थः

नी.
६

कालेतदात्मफलदस्त्वसौ ॥

अथग्रहांतरस्यजन्मकालीनदृष्ट्यवस्थितान्नफलविशेषमाह
दृष्टेति अत्रवर्षकालीनंजन्मकालोपिग्रहणं पंचवर्गादिब
लंविचार्यं ततोयःखेटोग्रहोजन्मकालेयादृशिदृष्टेयादृशरा
स्वस्यमित्रस्यवासमस्यवाशत्रोर्वादृष्टायांतिष्ठतियादृशीत्वने
नस्वामिधर्मादृष्टायाम्प्रवर्ततेतादृशांदृष्टायांतादृगेवात्म
केमहेइत्यर्थः तास्मिन्ग्रहेयोग्रहोमुथशिलीवासमदृस्तेजसा
धनेनिक्षिपति अस्मिन्नब्देवर्षकालेपितादृशीजन्मकालसदृ
शीसतिकोर्थः जन्मकालवद्वर्षकालेपितस्यग्रहस्यदृष्टायां
यएवग्रहोमुथशिलस्तदासमदृगाधत्तेअसौग्रहस्तुतदात्म
फलदस्तत्स्वरूपानुसारेणक्रूरसौम्यविवेकेनसबलत्वनिर्ब
लत्वविवेकेनसदसत्स्थानावस्थित्याशोदितान्युदितत्वाभ्यां
स्थयावावर्षकालेपिशुभाशुभफलदोभवति यथोदाहरणं
कल्प्यतेजन्मकालेराज्यभावाधीशोमेषेविंशत्यंशोपरिस्वदृष्टा
यामस्तितस्मिन्भौमेअन्योग्रहःसुखभवनाधीशःषोडशांश
मितःसन्मुथशिलयोगस्तदासमदृगाधत्तेएवंवर्षकालेपि
भौमःस्वीयमित्रादिदृष्टायांतिष्ठतितत्रभौमशुक्रयोर्मुथशि
लंकुर्वस्तेजआधत्तेइत्ययोजन्मकालवर्षकालयोस्तारतम्य
विधायतस्मिन्वर्षेशुक्रःस्वीयदृष्टायांतिष्ठतितत्रभौमशुक्र
योर्मुथशिलंकुर्वस्तेजआधत्तेइत्यंयोजन्मकालव भौमा
स्वभावादिनादशमभावसंबंधिपदार्थप्राप्यस्वभावेनसं
ख्यादिपदार्थमपिकंजनयतिएवंसमतोद्योगविचार्यः ३८

योजन्मनिफलंदातंविमुथशिरिफोस्यवेत् अब्दलग्नाद्धपभवस्तस्मिन्नब्देनतत्फलम् ३९

अथपुनर्जन्मकालीनग्रहफलविशेषेणवर्ष
कालेकंचिद्विशेषमनुष्टुभाम्याह योजन्मनीतिव्यत्यास
इति योग्रहोजन्मकालेफलंशुभमशुभंवादातुंविभुःसम
र्थास्तीतिनिर्णीतंतस्यग्रहस्याब्दकाले लग्नेशसंबंधीव
र्षेशसंबंधीवामूसरीफयोगश्चेद्भवेत्तदातस्मिन्वर्षेजन्मका
लनिर्णीतंफलंनभवतिव्यत्यासेतफलमादेश्यंयथायथा

पुनर्जन्मकालीनग्रहस्य बलग्रहयोर्वर्षेशसंबंधी मूसरीफयोगो ना
स्ति मंदगामी ग्रहाति गस्य शीघ्रग्रहस्य दीप्तभागाधिकत्वात्तदाज
न्मकालीनसदसत्फलं नास्मिन्वर्षे आदेश्यं यदा तु भयकृत्तत्र मुथ
शिलयोगोऽस्ति तदा विशेषतो वर्षे जन्मकालीनं फलं वाच्यं यदा त
नोभयकृत्तो मूसरीफयोगो नास्ति मुथशिलयोगोऽपि नास्ति
चेत्तदा उपचाराभावे पुनरुत्सर्गस्य स्थितिरिति नियमेन तत्कुह
संबंधि जन्मकालाश्रयफलं स्फुटं निश्चितं भवति ५९ ले वर्षेशेन वर्षलग्नेशेन

अभ्यासे फलमादेश्यमित्थशाले विशेषतः
नोभयं चेत्तदाप्यस्ति जन्माश्रयमिति स्फुटं ५०
पुत्राधिपो जन्मनि पुत्रभावं पश्यन्हि तेदाव
मसोऽसमर्थः अद्वेशयन्नाहृपमूशरीफोऽपु
त्रस्य नाशो भवतीह वर्षे ५१

५१ अथ प्रसंगादुदाहरणमिंद्रवज्रयाह पुत्राधिप इति योयो भावः
स्वामिदृष्टो युतो वा सोऽभिवर्द्धते स्यात्तस्याभिवृद्धिरिति पुत्रभा
वः पंचमभावः तस्याधिपः स्वामी जन्मनि जन्मकाले पुत्रभावं पश्यन्
तु मुसल्लहणात्वा स्वामिनाऽन्येन शुभग्रहेण वा युक्तो वलोकितो वा
पंचमभावोऽभवेत्तदा सोऽग्रहः स्वदशायां स्वांतर्दशायां समर्थो भवेत्
स एव ग्रहो यस्मिन्वर्षे हृपेन वर्षस्वामिना सह मूसरीफी स्यात्
यथा पुत्रभावस्वामी गुरुर्लाभे दशाशः वर्षभोमः पंचदशांशः
समस्तत्तदा मूशरीफयोगः स्यात्तस्मिन्वर्षेऽवश्यं पुत्रनाशः स्या
त् ५१

अग्रहेस्वगेहोगुरुर्मित्रदृष्टो मित्रदृष्टशाशशी
महोद्वादशमुक्तवर्षमूत्तेन शोभनः ५२

एवमात्मयमपि जन्मकालवशाद्वर्षे शुभफलप्राप्तियोगमनुष्टुभा
ह अद्वेस्वग इति निर्णीतो वर्षेस्वगेहोगुरुश्चेज्जन्मकाले यस्मिन्क
स्मिंश्चिद्राशौ वर्तमानः सन् मित्रदृष्टायामस्तितत्र गुरोरंशांशोऽजन्म
कालीनक्षेत्रोन्नतांशः सन्मुथशिलयोगाद्वासमहत्तेजोथा
कालीनक्षेत्रोन्नतांशः सन्मुथशिलयोगाद्वास मह त्ते जोथा
स्थापयामास गुरुर्वर्षेशोऽमूद्भवमं चेदि पश्यतीति कारणा
दयमद्भुःशोभनो वक्तव्यः ५२ **एवमन्येयमन्यत्र शु**
भाशुभफलं बुधैः बलाबलविवेकेन योग
त्रयविमर्शतः ५३ ॥ रामाय नमः ॥

२

अथैवंजन्मकालीनशुभग्रहवशाद्वर्षकालेपिशुभाशुभंफलंविचा
रातिदेशोनतुपृथग्भाद एवमिति योजन्मतिफलंशातमित्यादिक
ल्पनाप्रकारंमनसि निधायाभयोर्ग्रहयोर्जन्मकाले शुभाशुभफ
लदातृत्वं लविवेकेनोपलक्षत्वादिनाइदितविवेकेनयोगत्रया
त्मकविषयमत्रयथाविलवर्तमानस्यशुभाशुभफलयोर्योगानां
विमर्शतोविचाराद्वर्षेपितद्वैदेवाति रस्यशुभाशुभंफलंस्त्री
प्राप्त्यादिरूपमेवकल्पनयासमुन्नेयंविचारणीयंमसत्वीयंवि
चारकल्पनादिकंप्रदर्शितमितिशिवम् ४३ इतिश्रीगोविंदा
ख्योतिर्वित्सूनुमाधवज्योतिर्विद्विरचितायांसम्माद्विवेकवतोशि
शुबोधिन्यांमहत्पफलाध्यायःप्रथमः १

अथमुन्थहानिरूपणं स्वजन्मलग्नात्प्रति
वर्षमेकैकराशिभोगान्मुन्थहाभ्रमेण स्व
जन्मलग्नेरवितष्टयातशरच्छतेसाभमुखे
स्थितास्यात् ४४ अथमुन्थहाफलनिरूपणंतत्रमु
न्थहास्थाननियममुपेंद्रवज्रयाह जन्मलग्नादिति मुन्थहा
शब्देनयवनभाषयाजन्मलग्नमुच्यतेतेनैवसर्वत्रशुभाशुभफ
लोक्तेःस्वजन्मलग्नंवर्षलग्नेकस्मिन्भावेऽस्तीतिचिंतयेज्जन्म
कालेलग्नमासीत्तस्मात्प्रतिवर्षमेकैकराशिवृद्धिरूपेणभ्रमण
चलनेनमुन्थहास्थितिरितिशेषः यथाजन्मलग्नंवृषस्थंचेत्
मुन्थहाद्वितीयवर्षेमिथुनस्थेत्यादिमुन्थहास्थितिप्रकारेऽ
ष्टवर्षेभवति तत्रलघुप्रकारउच्यते तत्रस्वजन्मकाला
द्यावन्तोगतशरदोगतवर्षाणिरविभिर्द्वादशभिस्तष्टाभिर्भ
क्तावशिष्टमितिशरद्भिःस्वजन्मलग्नंराश्यादिएपस्यनेयु
तंसाभमुखाराश्यादिकेस्थितामुन्थहास्यात् सापियदि
द्वादशाधिकातदापुनर्द्वादशतष्टाशेषंमुन्थहास्यात् १

प्रत्यहंशरलिप्ताभिर्वर्द्धतेसाऽनुपाततः सा
र्द्धंसार्द्धयंमासइत्याहुःकेपिसूरयः ४५
अथमासप्रवेशादिनप्रवेशयोर्मुन्थहास्थानमनुष्टुभाह प्रत्यह
मितिस्पष्टार्थम् अत्रपातइतिराशिकात् २

स्वामिसौम्येत्थशालात्सौम्यत्वंतनुतेस्वाभयेऽहेर्जः
भावालोकनसंयोगात्फलमस्यानिरूप्यते

अथ मुथहाया नैसर्गिकं शुभाशुभं फलमनुष्टुभाह स्वामिसौम्ये
त्तमिति पूर्वार्द्धं स्पष्टं मुथहा कस्मिन्भावे स्थिता कोवा नोचयहे
। वलोकयानि तत्सेवाधि अस्या मुन्थहायाः फलं निरूप्यते ३

वर्षलग्नात्सहाया स्यात्परिपूर्णेषशोभना ।
शुभपाके मीयगास्वामिसंदत्तेन्यशेषमाहृते

अथ भावास्थितस्य मुथहाया सामान्यतः शुभाशुभं फलम ४
नुष्टुभाह वर्षलग्नादिति स्पष्टार्थं पद्यम् स्वामिस्वामितम् ४

शत्रुक्षयं मानसमत्नाषिलाभं प्रतापवृद्धिं नृप
तेः प्रसादं शरीरपुष्टिं विविधोद्यमाप्तं ददा
ति सौख्यं मुथहातनुस्था ५

अथ प्रत्येकं मुन्थहाया द्वादशभावावस्थिति फलान्युपजाति
भिर्विवक्षुः संस्तावतनुस्थितमुन्थहाफलमाह शत्रुक्षय
मिति स्पष्टार्थं ५

उत्साहतोर्थागमनं यशश्च स
द्बन्धुसन्मानन्नृपाश्रयाश्च । मिष्टान्नभो
गो बलपुष्टिसौख्यं स्याद्द्वितीये मुथहाय
दाहः ६ अथ द्वितीयभावास्थितमुन्थहाफलमाह
उत्साहतइति उत्साहो मनः संतोषस्तस्मात् स्पष्टार्थम् ६

पराक्रमाद्वित्तयशःसुखानि सौंदर्यसौख्यं
द्विजदेवपूजा सर्वोपकारस्तनुपुष्टिकांती
नृपाश्रयाश्चेन्मुथहातृती
अथ तृतीयभावास्थित
मुन्थहाफलमाह पराक्रमादिति स्पष्टार्थं पद्यं ७

शरीरपीडारिभीः स्ववर्गवैरं मनस्ताप
तिरुद्यमत्वे स्यान्मुथहायां सुखभावगा
यां जनापवादामयवृद्धिडःखं ८

अथ चतुर्थभावास्थितमुन्थहाफलमाह शरीरपीडाइति स्प
ष्टार्थं स्वस्य वर्गो ज्ञातयः स्ववर्गास्सस्मुदायेन सह वैरं कलहः आ
मयो रोगः ८

नी०
११

यदीस्थदापंचमगाह्वेशे सद्बुद्धिसौख्यात्म
जवित्तलाभः प्रतापवृद्धिर्विविधाविला
सादेवद्विजार्चान्नृपतिप्रसादः ९

अथ पंचमभावस्थितस्य थदाफलमाह यदीशिदेति स्पष्टार्थ पद्यं ९

क्रूरात्मसंगो वृषिस्ट्य श्रमयोरुज
त्तिस्करतोन्नपाद्वा कार्यार्थनाशोम्नथदा
रिगा वे दुर्दृद्दिशेद्दिः स्वकृते नुपातः १०

अथ षष्टमभावस्थितस्य थदाफलमाह क्रूरात्मेति स्पष्टार्थ स्वकृते स्वयंकृतेकार्थे नुताप: १०

कलत्रबंधुव्यसनातिभीतिरुत्साहभंगो
धनधर्मनाशः द्यूतोपगे चेन्न थदा तनो
स्याडुजा मनोमोहविरुद्धचेष्टा ११

अथ सप्तमभावस्थितस्य थदाफलमाह कलत्रेति स्पष्टार्थ कलत्रस्त्रीव्यसने द्यूतादिरुजोरोगः ११

भयं रिपोस्तस्करतो विनाशो धर्मार्थयो
र्दुर्व्यसनामयाश्च मृत्युस्थिताचेन्न थदा
नराणां बलत्यः स्याद्भ्रमनस्तहरे १२

अथाष्टमभावस्थितस्य थदाफलमाह भयमिति स्पष्टार्थ १२

स्वामित्वमर्थोपगमीन्नृपेभ्यो धर्मोत्स
वपुत्रकलत्रसौख्यं देवद्विजार्चापरमं
धाश्च भाग्योदयो भाग्यगतेथिदायाम् १२

अथ नवमस्थानस्थितस्य थदाफलमिदं वक्ष्याह स्वामित्वमिति स्पष्टार्थं १३

नृपप्रसादं स्वजनोपकारं सत्क।
र्मसिद्धिं द्विजदेवभक्तिम् यशोभिवृद्धो
विविधार्थलाभं दत्ते म्बरस्थामथदापदाति

अथ दशमस्थानस्थितमुथहाफलमाह नृपेति स्पष्टार्थं १४

यदीथिहा लाभगता विलाससौभाग्यनैरुज्यमनःप्रसादाः भवंति राजाश्रयतो धनानि सन्मित्रपुत्राभिमतास्नयश्च १५

अथैकादशस्थानस्थितमुथहाफलमाह यदीथिहेति स्पष्टार्थम् १५

